# झारखण्ड शैक्षिक अनुसन्धान एवं प्रशिक्षण परिषद्, राँची।
# वार्षिक परीक्षा 2023-24
# आदर्शप्रश्नपत्रम्
# संस्कृतम् (ऐच्छिकम्)
# (बहुविकल्पीयाः प्रश्नाः)

**कक्षा – एकादशी** **विषयः - संस्कृतम्**

**समयः - 60 निमेषाः** **पूर्णांकाः – 40**

---

**सामान्यनिर्देशाः -**

- **अस्मिन् प्रश्नपत्रे चत्वारिंशत् (40) प्रश्नाः। (इस प्रश्न-पत्र में 40 प्रश्न हैं।)**
- **सर्वे प्रश्नाः अनिवार्याः। (सभी प्रश्न अनिवार्य हैं।)**
- **प्रत्येकप्रश्नार्थं एकोऽङ्को निर्धारितः। (प्रत्येक प्रश्न के लिए एक अंक निर्धारित है।)**
- **प्रत्येकप्रश्नस्य चत्वारो विकल्पाः| उचितविकल्पं चिनुत| (प्रत्येक प्रश्न के चार विकल्प दिए गए हैं| उचित विकल्प का चयन करें|)**
- **अनुचितोत्तरार्थं कोऽपि नकारात्मकाङ्को नास्ति | (गलत उत्तर के लिए कोई नकारात्मक अंक नहीं है|)**

---

**अपठितांशावबोधनम्**

**निर्देश :अधोलिखितं गद्यांशं पठित्वा प्रदत्तान् प्रश्नान् विकल्पेभ्यः उत्तरं चिनुत-**

अस्माकं जीवने अनेके जनाः सहचारिणः भवन्ति यथा मित्राणि, बान्धवाः आदयः। परं विपत्तिकाले एव एतेषां मूल्यांकनम् भवति। आचार्येण चाणक्येन उक्तम्-यः जनः रोगसमये भवतः पार्श्वे तिष्ठति स एव यथार्थः सहचरः भवति। यदा जीवने कोऽपि भयंकरं कष्टं प्राप्नोति, तस्मिन् समये च यः जनः साहाय्यं करोति सः निश्चयेन सत्यः सखा भवति। एताद्दशैः जनैः सह कदापि मित्रता न त्यजनीया। यथार्थमित्राणि तु सदैव सम्माननीयाः।

प्रश्नाः

1.मित्राणां मूल्यांकनम् कदा भवति?
(क) सम्पत्तिकाले
(ख) ददातिकाले
(ग) विपत्तिकाले
(घ) उन्नतिकाले

2.के सम्माननीयाः भवन्ति?
(क) अमित्राणि
(ख) कुमित्राणि
(ग) सौमित्राणि

(घ) यथार्थमित्राणि

3.यथार्थमित्रैः सह का न त्यजनीया ?

(क) शत्रुता

(ख) मित्रता

(ग) रिपुता

(घ) ईर्ष्या

4. 'कष्टम्' इति विशेष्यस्य विशेषणपदं किम् अत्र प्रयुक्तम्?

(क) भयंकरम्

(ख) सत्य:

(ग) कदापि

(घ) निश्चयम्

5. 'एतेषां' पदे का विभक्तिः?

(क) चतुर्थी

(ख) पंचमी

(ग) षष्ठी

(घ) सप्तमी

## पठितावबोधनम्

**निर्देश:-अधोलिखितं पद्यं पठित्वा प्रदत्तान् प्रश्नान् विकल्पेभ्य: उत्तरं चिनुत-**

**तत्रास्तीशः, कठिनां भूमिं**

**यत्र हि कर्षति लाङ्गलिक:।**

**यत्र च जनपदरथ्यकर्ता**

**प्रस्तरखण्डान् दारयते॥**

**6.** उपर्युक्तपद्यांश: कस्मात् ग्रंथात् संकलित:?

(क) मृच्छकटिकात्

(ख) गीताञ्जल्या:

(ग) रामायणात्

(घ) जातकमालाया:

7.लाङ्गलिक:किं करोति ?

(क) सीव्यति

(ख) कर्षति

(ग) शिक्षयति

(घ) उपदिशति

8. प्रस्तरखण्डान् क: दारयते ?

(क) रथ्यकर्ता

(ख) शौचिक:

(ग) स्वर्णकार:

(घ) शिक्षक:

9. '**कर्षति**' इत्यस्मिन् पदे क: लकार: प्रयुक्त:?

(क) लृट्लकार:

(ख) लट्लकार:

(ग) लोट्लकार:

(घ) लङ्गलकार:

**10.'कठिनां भूमिं'** अनयो: पदयो: विशेषणपदं किम् ?

(क) कठ्

(ख) भूमिं

(ग) कठिनां

(घ) भू

**निर्देश:-अधोलिखितं नाट्यांशं पठित्वा प्रदत्तान् प्रश्नान् विकल्पेभ्य: उत्तरं चिनुत-**

**रदनिका-- (सनिर्वेदं निःश्वस्य) जात! कुतोऽस्माकं सुवर्णव्यवहारः ? तातस्य पुनरपि ऋद्ध्या सुवर्णशकटिकया क्रीडिष्यसि । (स्वगतम्) तद्यावद् विनोदयाम्येनम्। आर्याया: वसन्तसेनायाः समीपमुपसर्पिष्यामि। (उपसृत्य) आर्ये! प्रणमामि।**

**वसन्तसेना --रदनिके! स्वागतं ते। कस्य पुनरयं दारकः ? अनलङ्कृत- शरीरोऽपि चन्द्रमुखम् आनन्दयति मम हृदयम्।**

**रदनिका-- एष खलु आर्यचारुदत्तस्य पुत्रो रोहसेनो नाम।**

**वसन्तसेना - -(बाहू प्रसार्य) एहि मे पुत्रक ! आलिङ्ग।**

**(इत्यङ्के उपवेश्य)**

**अनुकृतमनेन पितुः रूपम्।**

11. उपर्युक्तनाट्यांश: कस्मात् ग्रंथात् संकलित: ?

(क) अभिज्ञानशाकुन्तलात्

(ख) मृच्छकटिकात्

(ग) उत्तररामचरितात्

(घ) रूपरुद्रीयात्

12. रोहसेन: कस्य पुत्र: आसीत्?

(क) वसन्तसेनाया:

(ख) रदनिकाया:

(ग) चारूदत्तस्य

(घ) शकारस्य

13."**एहि मे पुत्रक ! आलिङ्ग।**" इति कस्य कथनम्?

(क) चारूदत्तस्य

(ख) वसन्तसेनाया:

(ग) रदनिकाया:

(घ) मदनिकाया:

14.'**क्रीडिष्यसि**' पदे क: लकार: प्रयुक्त: ?

(क) लट्

(ख) लृट्

(ग) लोट्

(घ) लङ्ग

15. '**अनलङ्कृत- शरीर:**' अनयो: पदयो: विशेष्यपदं किम्?

(क) अनल

(ख) शरीर:

(ग) अनलङ्कृत

(घ) लङ्कृत

**निर्देश:-अधोलिखितं गद्यं पठित्वा प्रदत्तान् प्रश्नान् विकल्पेभ्य: उत्तरं चिनुत-**

**स्निग्धमश्नीयात्, स्निग्धं हि भुज्यमानं स्वदते, क्षिप्रं जरां गच्छति, वातमनुलोमयति, शरीरमुपचिनोति, दृढीकरोतीन्द्रियाणि, बलाभिवृद्धिमुपजनयति, वर्णप्रसादं चाभिनिर्वर्तयति; तस्मात् स्निग्धमश्नीयात्।**

**मात्रावदश्नीयात्, मात्रावद्धि भुक्तं वातपित्तकफानपीडयदायुरेव विवर्धयति केवलं सुखं विपच्यते, न चोष्माणमुपहन्ति, अव्यथं च परिपाकमेति, तस्मान्मात्रावदश्नीयात्।**

**16. कीदृशं** भोजनम् इन्द्रियाणि दृढीकरोति ?

(क) मात्रावद्

(ख) उष्णम्

(ग) शीतलम्

(घ) स्निग्धम्

17. मात्रावद् कथम् अश्नीयात् ?

(क) आयुविवर्धनाय

(ख) बलं विवर्धनाय

(ग) वर्णं विवर्धनाय

(घ) रोगं विवर्धनाय

18. 'तस्मात्' पदे का विभक्तिः?

(क) द्वितीया

(ख) तृतीया

(ग) चतुर्थी

(घ) पंचमी

19. '**चोष्माणम्**' अस्य सन्धिविच्छेदं किम् ?

(क) चो+ ऊष्माणम्

(ख) चोष्मा+ णम्

(ग) च + उष्माणम्

(घ) च + ऊष्माणम्

20. अव्ययं चिनुत –

(क) च

(ख) वर्णप्रसादं

(ग) भुक्तं

(घ) अव्यथं

## खण्ड-ग
## (व्याकरणकार्यम्)

21. सप्ताहे सप्त दिनानि -----।

(क) भवति

(ख) भवत:

(ग) भवन्ति

(घ) भवतु

22. एकदा अहम् एकं व्याघ्रं -------।

(क) अपश्यम्

(ख) अपश्याव

(ग) अपश्याम

(घ) अपश्य:

23. 'सेव्' धातो: लृट्लकारे प्रथमपुरुषबहुवचने रूपं चिनुत-

(क) सेविष्यते

(ख) सेविष्येते

(ग) सेविष्यन्ते

(घ) सेविष्यसे

24. 'पितृ' शब्दस्य चतुर्थी एकवचने रूपं भवति-

(क) पित्रा

(ख) पित्रे

(ग) पितु:

(घ) पितरम्

25. स: मह्यं --------- आनयति।

(क) पुष्पा:

(ख) पुष्पौ

(ग) पुष्पाणि

(घ) पुष्प:

26. ------अभित: वृक्षा: सन्ति।

(क) विद्यालयस्य

(ख) विद्यालयम्

(ग) विद्यालय:

(घ) विद्यालयात्

27. भिक्षुक:------- काण: ।

(क) नेत्रेण

(ख) नेत्रात्

(ग) नेत्रस्य

(घ) नेत्रम्

28. स्वस्ति ---------।

(क) तव

(ख) त्वाम्

(ग) तुभ्यम्

(घ) तस्य

29.’ ह्’ वर्णस्य उच्चारणस्थानं किम् ?

(क) तालु:

(ख) दन्ता:

(ग) ओष्ठौ

(घ) कण्ठ:

30. एतेषु वर्णेषु दन्त्यवर्ण: क: ?

(क) व्

(ख) प्

(ग) ध्

(घ) ख्

31. “क्+ष्+अ+त्+र्+इ+य्+अ:” इत्यस्य वर्णसंयोजनं कृत्वा लिखत-

(क) क्षत्रीय:

(ख) क्षत्रिया

(ग) क्षेत्रीय

(घ) क्षत्रिय:

32.मया पुस्तकं --------।

(क) पठति

(ख) पठ्यते

(ग) पठामि

(घ) पठ्यन्ते

33. -------- किं पठ्यते ?

(क) त्वम्

(ख) त्वाम्

(ग) त्वया

(घ) तुभ्यम्

34. 'भग्नावशेष:' इत्यस्य सन्धिविच्छेदं चिनुत-

(क) भग्ना + वशेष:

(ख) भग्न+ अवशेष:

(ग) भग्नाव + शेष:

(घ) भग्नौ + शेष:

35. 'क:+ चित् ' अस्य सन्धिपदं चिनुत-

(क) कश्चित्

(ख) कस्यचित्

(ग) क:चित्

(घ) कस्मिंश्चित्

36. '**गीताञ्जलि:**' इत्यस्य रचनाकार: क:?

(क) अरविन्दघोष:

(ख) आर्यशूर:

(ग) शूद्रक:

(घ) रवीन्द्रनाथटैगोर:

37.शूद्रकस्य रचनां चिनुत-

(क) मृच्छकटिकम्

(ख) जातकमाला

नवोन्मेष शोध नेतृत्व JCERT

(ग) भवानी भारती

(घ) रसविमानम्

38. '**बाणोच्छिष्टं जगत्सर्वं**'इति कस्य विषये प्रसिद्ध:?

(क) माघस्य

(ख) बाणभट्टस्य

(ग) अम्बिकादत्तस्य

(घ) श्रीहर्षस्य

39. कविषु ------- श्रेष्ठ:।

(क) कालिदास:

(ख) कालिदासे

(ग) कालिदासेन

(घ) कालिदासस्य

40.'**रूपरुद्रीयम्**' कस्य रचना ?

(क) अभिराजराजेन्द्रमिश्रस्य

(ख) कालिदासस्य

(ग) भारवे:

(घ) माघस्य

**झारखण्ड शैक्षिक अनुसन्धान एवं प्रशिक्षण परिषद्, राँची।**
**वार्षिक परीक्षा 2023-24**
**आदर्शप्रश्नपत्रम्**
**संस्कृतम् (ऐच्छिकम्)**
**(बहुविकल्पीयाः प्रश्नाः)**

**कक्षा – एकादशी** **विषयः - संस्कृतम्**

**उत्तराणि**

1. (ग) विपत्तिकाले
2. (घ) यथार्थमित्राणि
3. (ख) मित्रता
4. (क) भयंकरम्
5. (ग) षष्ठी
6. (ख) गीताञ्जल्याः
7. (ख) कर्षति
8. (क) रथ्यकर्ता
9. (ख) लट्लकारः
10. (ग) कठिनां
11. (ख) मृच्छकटिकात्
12. (ग) चारूदत्तस्य
13. (ख) वसन्तसेनायाः
14. (ख) लृट्
15. (ख) शरीरः
16. (घ) स्निग्धम्
17. (क) आयुर्विवर्धनाय
18. (घ) पंचमी
19. (ग) च + उष्माणम्
20. (क) च
21. (ग) भवन्ति
22. (क) अपश्यम्
23. .(ग) सेविष्यन्ते
24. (ख) पित्रे
25. (ग) पुष्पाणि
26. (ख) विद्यालयम्
27. (क) नेत्रेण
28. (ग) तुभ्यम्
29. (घ) कण्ठः
30. (ग) ध्
31. (घ) क्षत्रियः
32. (ख) पठ्यते
33. (ग) त्वया
34. (ख) भग्न+ अवशेषः
35. (क) कश्चित्
36. (घ) रवीन्द्रनाथटैगोरः
37. (क) मृच्छकटिकम्
38. (ख) बाणभट्टस्य
39. (क) कालिदासः
40. (क) अभिराजराजेन्द्रमिश्रस्य

नवोन्मेष शोध नेतृत्व JCERT